गौड़देशः समाख्यातः सर्व्वविद्याविशारदः ।
गोकर्णेशात् पूर्व्वभागे आर्य्यावर्त्तात्तु चोत्तरे ॥
तैरभुक्तात् पश्चिमे तु महापुण्याच्च सर्व्वतः ।
महाकोशलदेशश्च सूर्य्यवंशपरायणः ॥
कालेश्वरं समारभ्य तप्तकुण्डान्तकं शिवे ।
मगधाख्यो महादेशो यात्रायां न हि दुष्यति ॥
दक्षोत्तरक्रमेणैव क्रमात् कीकटमागधौ ।
चरणाद्रिं समारभ्य गृध्रकूटान्तकं शिवे ! ॥
तावत् कीकटदेशः स्यात्तदन्तर्मागधो भवेत् ।
जगन्नाथप्रान्तदेशश्चोत्कलः परिकीर्त्तितः ॥
कामगिरिं समारभ्य द्वारकान्तं महेश्वरि ! ।
श्रीकुन्तलाभिधो देशो नूनं शृणु महेश्वरि ! ॥
कामगिरेर्द्दक्षभागे मरुदेशात्तथोत्तरे ।
हूनदेशः समाख्यातः शूरास्तत्र रमन्ति च ॥
त्र्यम्बकं समारभ्य कोटिदेशस्य मध्यगे ।
समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः ॥
ब्रह्मपुत्रात् कामरूपात् मध्यभागे तु कैकयः ।
मागधाद्दक्षभागे तु विन्ध्यात् पश्चिमतः शिवे ! ॥
शौरसेनाभिधो देशः सूर्य्यवंशप्रकाशकः ।
हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे ॥
पाञ्चालपूर्व्वभागे तु कुरुदेशः प्रकीर्त्तितः ।
मरुदेशात् पूर्व्वभागे कामाद्रेर्द्दक्षिणे शिवे ! ॥
सिंहलाख्यो महादेशः सर्व्वदेशोत्तमोत्तमः ।
शिलहट्टात् पूर्व्वभागे कामरूपात्तथोत्तरे ॥
पुलन्धिदेशो देवेशि ! नरनारायणः परः ।
गणेश्वरात् पूर्व्वभागे समुद्रादुत्तरे शिवे ! ॥
कच्छदेशः समाख्यातः सुदेशं शृणु सादरम् ।
पुलिन्दादुत्तरे भागे कच्छाच्च पश्चिमे शिवे ! ॥
मत्स्यदेशः समाख्यातो मत्स्यबाहुल्यकारकः ।
वैराटपाण्ड्ययोर्म्मध्ये पूर्व्वदक्षक्रमेण तु ॥
मद्रदेशः समाख्यातो माद्रीशा तत्र तिष्ठति ।
शूरसेनात् पूर्व्वभागे गण्डक्याः पश्चिमे शिवे ! ॥
सौवीरदेशो देवेशि ! सर्व्वदेशाधमाधमः ।
अवन्तीतः पश्चिमे तु वैदर्भाद्दक्षिणोत्तरे ॥
नाटदेशः समाख्यातो बर्व्वरं शृणु पार्व्वति ! ।
मायापुरं समारभ्य सप्तशृङ्गात्तथोत्तरे ॥
बर्व्वराख्यो महादेशः सैन्धवं शृणु सादरम् ।
लङ्काप्रदेशमारभ्य मक्कान्तं परमेश्वरि ! ॥
सैन्धवाख्यो महादेशः पर्व्वते तिष्ठति प्रिये ! ।
एते षट्पञ्चाशद्देशा मया प्रोक्ता महेश्वरि ! ॥
एतन्मध्येऽपि देवेशि ! देशभेदा ह्यनेकशः ।
कोटिशः सन्ति देवेशि ! एते मुख्याः प्रकीर्त्तिताः ॥
रहस्यातिरहस्यञ्च गोप्यं पशुसङ्कटे ।
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥

देशकः, त्रि, (दिशतीति । दिश आदेशे + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) शास्ता । इति हेमचन्द्रः । ३ । १५२ ॥
"तथोन्मार्गप्रवृत्तस्य चास्तु सन्मार्गदेशकः ।
सन्तु मेऽतिथयः श्रद्धा चित्तदाने तथाच्युते ॥"
इति मार्कण्डेये । १६ । १७ ॥

देशकारी, स्त्री, रागिणीविशेषः । हनूमन्मते मेघरागस्य भार्य्या । अस्या जातिः संपूर्णः ग्रहं षड्जस्वरः गानसमयः वर्षर्त्तौ निशान्तः । अस्याः स्वरूपं सुन्दरस्त्री तिलयुक्तानना कमलपत्राक्षी दाड़िमस्तनी गौराङ्गी बिम्बोष्ठी मुक्ताहारकण्ठी कर्पूरचन्दनलिप्ताङ्गी सालङ्कारा नायकेन सहोपविश्य हावभावकटाक्षान् कुर्व्वती । सङ्गीतदर्पणमते अस्या गानसमयः प्रातर्वैराटीरागिण्या सह । अस्याः स्वरूपं नायकेन सह केलिकौतुकरता श्यामकेशभारा जितशरत्पूर्णचन्द्रानना अनङ्गराजिताङ्गी काञ्चनकलसद्युतिहारिकुचा कमलनयना मृदुभाषिणी । इति सङ्गीतशास्त्रम् ॥

देशरूपं, क्ली, (दिश्यते इति । दिश + कर्म्मणि घञ् । देशस्य हेतुयुक्तिदेशकालपात्रादिभिर्दिश्यमानस्य रूपम् । यद्वा, देशस्य देशानुरूपाचारस्य रूपम् ।) उचितम् । इत्यमरः ।२ । ८ । २४ ॥ (यथा, महाभारते । १२ । १०७ । ५ ।
"श्रीगृहस्थवृत्तिश्च यथा धर्म्मं प्रकीर्त्तितम् ।
लघुना देशरूपेण ग्रन्थयोगेन भारत ! ॥")

देशाखी, स्त्री, रागिणीविशेषः । हनूमन्मते हिन्दोलरागस्य द्वितीयरागिणी । तस्या जातिः षाड़वः ग्रहं गान्धारस्वरः गानसमयः वसन्तर्त्तौ पूर्व्वाह्णः । अस्याः स्वरूपम् । सुरूपा नारी चन्द्रवदना क्रोधना कलहप्रिया रोमहर्षा निष्कोषकरवालकरा मल्लवत् धूल्यवगुण्ठितबाहुवक्षाः बलमर्द्दितकक्षस्थापितशत्रुपक्षा सर्व्वदा स्वसमीपस्थापितनायका च । रागमालामते तु तस्याः स्वरूपं मल्लवत् परस्परमल्लक्रीड़ायां नियुक्ता । सा क्रीड़ामल्लकाण्डोत्क्षेपणप्रस्तरादुच्चोलनभूमिलुण्ठनादिरूपा । कल्लिनाथमते वसन्तरागस्य भार्य्या । सङ्गीतदर्पणमते अस्या जातिः संपूर्णः । अस्याः स्वरूपं कर्पूरादपि कमनीयाङ्गी कमलराजितनयना हर्षयुक्ता रसिका अतिधीरा किञ्चित्सङ्कुचिता दीर्घभुजा मल्लद्युतिमोचिनी च । इति सङ्गीतशास्त्रम् ॥

देशान्तरं, क्ली, (अन्यो देशः । मयूरव्यंसकादिवत् समासः ।) सुमेरुलङ्कयोर्मध्यरेखास्वरूपदेशस्वदेशयोरन्तरयोजनम् । इति सिद्धान्तरहस्यम् ॥ ये उदयान्तरकर्म्मणा लङ्कायामौदयिका ग्रहा जातास्ते देशान्तरकर्म्मणा स्वपुरोदयिकाः स्युः । तच्च द्विविधं एकं पूर्व्वापरं द्वितीयं याम्योत्तरं तच्चरसंज्ञमुक्तम् । यथा,—
"येऽनेन लङ्कोदयकालिकास्ते
देशान्तरेण स्वपुरोदये स्युः ।
देशान्तरं प्रागपरं तथान्यत्
याम्योत्तरं तच्चरसंज्ञमुक्तम् ॥"
इति सिद्धान्तशिरोमणिः ॥*॥
देशान्तरपरिभाषायां ब्रह्ममनुः ।
"वाचो यत्र विभिद्यन्ते गिरिर्व्वा व्यवधायकः ।
महानद्यन्तरं यत्र तद्देशान्तरमुच्यते ॥
देशनामनदीभेदान्निकटोऽपि भवेद्यदि ।
तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा ॥
दशरात्रेण या वार्त्ता यत्र न श्रूयतेऽथवा ॥
बृहस्पतिः ।
देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च ॥"
इत्युद्वाहतत्त्वम् ॥
"मुनिद्वयवचनोक्तवागादियोजनादिभेदसामञ्जस्यार्थम् एवं व्याख्यायते त्रितयवैशिष्ट्ये त्रिंशद्योजनाभ्यन्तरे द्वितयवैशिष्ट्ये तदुपरि एकवैशिष्ट्ये चत्वारिंशद्योजनोपरि वाग्गिरिमहानद्यन्तरितत्वभेदाभावेऽपि षष्टियोजनोपरि वैदेश्यम् ।" इति शुद्धिचिन्तामणिः ॥

देशिकः, पुं, (देशे प्रसितः इति । देश + ठक् ।) पथिकः । इति हेमचन्द्रः । ३ । १५७ ॥ (यथा, महाभारते । ७ । ५ । १० ।
"अदेशिको यथा सार्थः सर्व्वं कृच्छ्रं समृच्छति ।
अनायका तथा सेना सर्व्वान्दोषान् समृच्छति ॥")
गुरुः । यथा देशिको मूलमन्त्रेण इत्यागमः ॥
(यथा, महाभारते । १३ । १४७ । ४२ ।
"धर्म्माणां देशिकः साक्षात् स भविष्यति धर्म्मभाक् ।
धर्म्मविद्भिः सदेवेशो नमस्कार्य्यः सदोद्यतैः ॥")

देशिनी, स्त्री, (दिशतीति । दिश आदेशे + णिनिः । स्त्रियां ङीप् ।) तर्ज्जनी । इति शब्दरत्नावली ॥ (यथा, याज्ञवल्क्यसंहितायाम् । १ । १६ ।
"कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥")

देशी, स्त्री, रागिणीविशेषः । हनूमन्मते दीपकरागस्य भार्य्या । अस्या जातिः षाड़वः ग्रहं ऋषभस्वरः गानसमयः ग्रीष्मर्त्तौ मध्याह्नः । अस्याः स्वरूपं सुरूपा नारी हरिद्वसना अलङ्कृता यौवनमदेन कामासक्ता सती नायकशयनागारमागत्य निधुवनरता च । भरतमते तु मेघरागस्य पत्नी । सङ्गीतदर्पणमते हिन्दोलरागस्य भार्य्या । तस्या गानसमयः यामयुगलम् । तस्याः स्वरूपम् । निद्रायुक्तनयना आलस्ययुक्ता प्रियाभिमुखी नायकस्य निद्राभञ्जनार्थं मनोरञ्जनतानं गायन्ती रमणेच्छया रचितवेशा । भूषणगणशोभिता गौराङ्गी परिहितहरिद्वर्णशाटिका । इति सङ्गीतशास्त्रम् ॥ (सङ्गीतभेदः । यथा, सङ्गीतदर्पणे । १ । ३—६ ।
"गीतं वाद्यं नर्त्तनञ्च त्रयं सङ्गीतमुच्यते ।
मार्गदेशी विभागेन सङ्गीतं द्विविधं मतम् ॥
द्रुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च ।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ॥
तत्तद्देशस्थया रीत्या यत् स्याल्लोकानुरञ्जनम् ।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते ॥")

देश्यं, क्ली, (दिश्यते इति । दिश + कर्म्मणि ण्यत् ।) पूर्व्वपक्षः । इति शब्दरत्नावली ॥ देशार्हे, त्रि ॥ (देशे भवः । देश + "दिगादिभ्यो यत् ।" ४ ।